अगस्त २०१८ (वै. २०७५)
श्रावण कृष्ण चतुर्थी तः भाद्रपद कृष्ण पंचमी पर्यन्तम्
ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बालपत्रिका

वर्षम् - ६ अङ्कः :- १

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

''संस्कृत मंजरी''

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

''संस्कृत मंजरी''

(आई.एस.एस.एन.-२२७८ -८३६०)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवेदनाओं, शोध निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है ।

मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.१००/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

''संस्कृत मंजरी''

के स्थायी अध्येता बनें ।

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५

ISSN : 2347-1565 मूल्यम् ₹२५

संस्कृत-चन्द्रिका

'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-६ अङ्कः-१

अगस्त-२०१८

(वै० २०७५ श्रावण कृष्ण चतुर्थी तः भाद्रपद कृष्ण पंचमी पर्यन्तम्)

सम्पादकः

डॉ० जीतराम भट्टः

सचिवः

सहायकसम्पादकः

प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः

डॉ० आशुतोषदयाल माथुरः

डॉ० पंकजा घई

डॉ० पूर्वा भारद्वाजः

डॉ० धनञ्जयमणि त्रिपाठी

- अनुक्रमणिका -

क्र.सं.			पृ.सं.
१.	सम्पादकीयम्		
२.	तपसः सिद्धिः	-डॉ. हर्षदेवमाधवः	१
३.	बापुना सह यात्रा	-इन्दुशर्मा 'काङ्करोपाह्वा'	३
४.	गीतमानय (नाटकं)	-परमानन्द शर्मा ''प्रमोद''	५
५.	प्रबन्धक-योग्यता	-डॉ. नारायण शास्त्री काङ्करः	१२
६.	ग्रामोऽयं विनष्टो	-डॉ. केशवरामशर्मा	१३
७.	अनिष्ट चिन्तकस्य कुशलं न	-डॉ. नारायण शास्त्री काङ्करः	१५
८.	क्रोधालु ऋषि	-डॉ. हर्षदेवमाधवः	१६
९.	सहनशीलतायाः प्रभावः	-डॉ. लता विगः	१७
१०.	पुत्रप्राप्त्यर्थम् कामना	-सरला पटैरिया	१८

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELH

प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

ISSN : 2347-1565

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

सदस्यताशुल्कम्

©	प्रति-अङ्कम्	:	25 रूप्यकाणि, $2.5
©	वार्षिकम्	:	250 रूप्यकाणि, $25.00

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:

Demand Draft, Money order or by CTC Cheque

(In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

सम्पादकीयम्

वयं जानीमः यत् संस्कृतिः संस्कृताश्रिताऽस्ति सर्वाः भाषाश्च संस्कृतादेव निःसृताः सन्ति। सत्यं यद् भारतीया संस्कृतिः संस्कृतेनैवानुप्राणिताऽस्ति। न केवलं भारतीयाऽयामपितु मानवसंस्कृतौ संस्कृतस्यैव प्रभावो विद्यते। अत एव यत्र यत्र संस्कृतस्य प्रसारो भवति तत्र तत्र जनाः संस्कृताः सज्जनाश्च भवन्ति। केचन शिक्षकाः चिन्तयन्ति यत्केवलं विद्यालयेष्वेव संस्कृतशिक्षणेन संस्कृतेः प्रसारो भविष्यति। ते वदन्ति यत् शिक्षणसंस्थानां पाठ्यक्रमेषु संस्कृतनिर्धारणायैव चिन्ता करणीया लोके च संस्कृतप्रसारस्यावश्यकता नाऽस्ति। अहं मन्ये ते सन्ति शिक्षकाः, ते केवलं स्वकीय-शिक्षणसंस्थानां स्वाजीविकायाश्च विषये चिन्तयन्ति। येभ्यः गृहेभ्यः छात्राः शिक्षणसंस्थासु गच्छन्ति यस्मिन् समाजे ते वसन्ति यैश्च सह ते समाचरन्ति तेषां विषये तादृशाः शिक्षकाः न चिन्तयन्ति। आत्मकेन्द्रितेन दृष्टिकोणेनैव तेषां संकुचितो विचारोऽयम्। अतएव ते लोके संस्कृतप्रचारस्य महत्त्वं नैव स्वीकरिष्यन्ति।

यद्यपि शिक्षणसंस्थानां पाठ्यक्रमेऽपि पाठ्यचर्यायाः व्यवस्था भवति। तत्र च दिल्ली संस्कृत-अकादम्याः कार्यक्रमैः गतिविधिभिश्च पाठ्यचर्यायोजने साहाय्यं स्वीकर्तुं शक्यते। ये शिक्षकाः वस्तुतः मनोयोगेन शिक्षणकार्यं कुर्वन्ति ते तु संस्कृताकादम्याः कार्यक्रमेषु समागच्छन्ति छात्राञ्च प्रेरयन्ति, किन्तु योऽस्ति दुराग्रही, 'ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति।' तथापि प्रार्थ्यन्ते ते शिक्षकाः मया यत्पाठ्यचर्यायाः महत्त्वं विज्ञाय दिल्ली संस्कृताकादम्याः कार्यक्रमेषु सम्मिलिताः भवेयुः छात्राञ्च प्रेरयेयुः।

सुमनसां प्रतिभाप्रतिभासिका
क्षितितलात्तमसश्च विनाशिका।
शिशुकिशोरयुवप्रियसाधिका
विजयते भुवि संस्कृत-चन्द्रिका॥

निवेदकः
डॉ. जीतरामभट्टः
सचिवः

तपसः सिद्धिः

-डॉ० हर्षदेवमाधवः

एकः ऋषिः आसीत्। तस्य नाम सुतपाः आसीत्। तस्य माता च पिता च तपस्विनौ आस्ताम्। अतः बाल्यकालात् एव सुतपाः वने निवसति स्म।

दिने दिने तस्य तपः वर्धते स्म। कतिपयमासेभ्यः पश्चात् सः निराहारं तपः अकरोत्।

एकदा केचित् राक्षसाः पिशाचैः सह तस्य यज्ञे विघ्नम् उत्पादयितुम् आगताः। किन्तु ऋषिः विहस्य तान् नमस्कारान् अकरोत्। राक्षसाः सुतपसः पादयोः अपतन्। ऋषिः विहस्य तान् नमस्कारान् अकरोत्। राक्षसाः सुतपसः पादयोः अपतन्। ऋषिः पुनरपि मधुरेण हास्येन अवदत्, 'बान्धवाः! स्वस्थाः भवतः। शान्ताः भवत। भयरहिताः भवत। राक्षसाः प्रणामं कृत्वा अगच्छन्। स्वर्गस्य देवानां राजा इन्द्रः भयभीतः अभवत्। सुतपसः तपसि भङ्गं कर्तु सः निर्णयम् अकरोत्। सः अप्सरसः गन्धर्वान् विद्याधरान् किन्नरान् ऋषि तपसः प्रचालयितुं आज्ञापयत्। सर्वे तपोवनम् आगच्छन्। अप्सरसः नृत्यम् अकुर्वन् गन्धर्वाः दिव्यगीतानि अगायन्। विद्याधराः सङ्गीतम् अवादयन्। किन्नराः अपि ऋषिं लोभयितुं प्रयत्नम् अकुर्वन्। अन्ये ऋषयः चलिताः अभवन्। तेषां तपसः भङ्गः अभवत्।

किन्तु सुतपसः ध्यानं न शिथिलम् अभवत्। बहुकालं यावत् सः ध्यानम् अकोरत् । यदा समाधेः जागरितः अभवत् तदा सः उच्चैः अहसत्। सः अवदत्, 'भ्रातरः गन्धर्वाः, किन्नराः विद्याधराः! भगिन्यः अप्सरसः। युष्माकं गीतैः, नृत्यैः, वाद्यैः देवगणाः प्रसन्ना भवन्ति। किन्तु अहं तु नित्यं प्रसन्नः। सङ्गीतं विना, गीतं विना, नृत्यं विना तपसा प्रसन्नः। अतः युष्माकं परिश्रमः विफलः अस्ति।

एकदा सुतपाः ब्रह्ममुहूर्ते सहसा समाधिम् अत्यजत्। सुतपाः स्नानार्थं नदीतीरम् अगच्छत्। यदा सुतपाः स्नानम् अकरोत् तदा सः महाकायं सिंहम् अपश्यत्। सिंहः अवदत्, 'महर्षे सुतपः! सादरं वन्दे। मम पृष्ठे आरोहणं कुरु।' ऋषिः सिंहस्य पृष्ठे आरोहणम् अकरोत्। सिंहः सवेगं अगम्यं वनं प्राविशत्। ततः मार्गे एकः महान् पर्वतः आगतः। सिंहः एकस्याः गुहायाः समीपे अतिष्ठत्। सिंहः सविनयम् अवदत् 'ऋषे! गुहां

प्रविश। शुभाः ते पन्थानः सन्तु। गुहायाम् अन्धकारः आसीत्। किन्तु शीघ्रम् एकः महाकायः नागराजः आगच्छत्। तस्य सहस्रं फणाः सन्ति। फणासु रत्नानि सन्ति। रत्नप्रकाशे गुहा अपि अलौकिका अभवत्। सर्पः ऋषेः चरणयोः प्रणामम् अकरोत्। सर्पः अवदत् 'हे महर्षे सुतपः! माम् अनुसर।'

ऋषिः तस्य पृष्ठे अगच्छत्। किञ्चित् कालं यावत् ऋषिः अचलत्। गुहायाः मुखम् आगतम्। ऋषिः गुहायाः द्वितीयस्य मुखस्य समीपे स्थितम् एकं नन्दीगणम् अपश्यत्। नन्दी दुग्धवर्णः धवलः, उन्नतः पर्वत इव महान् आसीत्। नन्दी भूमितले मस्तकं नामयित्वा उपाविशत्। सुतपाः नन्दिनं प्राणमत्। तदा नन्दी अवदत्, 'हे महर्षे! मम पृष्ठे उपविश।' नन्दी ऋर्षि पृष्ठे धृत्वा आकाशमार्गे अगच्छत्। कस्मिन् अपि दिव्यलोके सुतपाः आगतः। उन्नतगिरेः शृङ्गे दिव्यं स्थानम् आसीत्। कल्पवृक्षाणां छायायां विविधरत्नानां सिंहासनम् आसीत्। सुतपाः सिंहासने उपविष्टम् शिवं अपश्यत्। सुतपाः ईश्वरः मन्दं मन्दम् अहसत्। सः अवदत् 'वत्स, वद किं ते ददामि?'

सः ईश्वरं प्रत्युत्तरम् अवदत्, भवन्! तव कृपया मया तव दर्शनं प्राप्तम्, अधुना मम न कापि कामना, ईश्वर! अवदत्, हे वत्य! त्वं धन्यः असि, त्वं सर्वेषां कल्याणमिच्छसि आत्मानः कृते किमपि न वाञ्छसि। अहं तुभ्यं मम लोके स्थानं ददामि। आकाशे तारकः भव। सर्वत्र तव पुण्यनाम प्रकाशितं भविष्यति।

- ८, राजतिलक वंगलो नं.
आबाद नगरम्, भोपाल
अहमदाबाद- ३८००५८

बापुना सह यात्रा

- इन्दुशर्मा 'काङ्करोपाह्वा'

अहं गतदिने आपणात् स्वस्मै एकां पञ्जिकां क्रीत्वा आगच्छन् आसम्। मया समीपे एव एकः निःशक्तः वयोवृद्धः व्यथितः इव भ्रमन् अदृश्यत।

अहं तस्य समीपे अगच्छं, तदा अपश्यं यत् सः केवलं अधोवस्त्रं तस्य पर्यदधात्, हस्ते च यष्टिः नेत्रयोश्च उपनेत्रम् आसीत्। अहं तम् अपृच्छम्-बाबा! किं अहं भवतः सहायतां कर्तुं शक्नोमि? बाबा मम हस्तं गृहीत्वा अकथयत् परन्तु अहं तु तं पश्यन् एव स्तब्धः अभवम्। सः तु महात्मागांधी इव दृश्यते स्म।

अहं अपृच्छम् अरू-बाबा! भवान् कः अस्ति? भवता कुत्र गन्तव्यम् अस्ति?''

बाबा उत्तरं दत्तवान्-''पुत्र! मम नाम मोहनदास करमचन्द गान्धी अस्ति। मया एकस्मिन् सम्मान-समारोहे गन्तव्यम् अस्ति, परन्तु मया अत्रत्याः मार्गाः एव न ज्ञायन्ते,

इदं श्रुत्वा एव अहं तु आनन्देन उच्छलितवान्, तं च प्रगाढम् आलिङ्गय अवदम्-''बापो! अद्य तु भवतः जन्मदिनम् अपि अस्ति न?''

''आं पुत्र! माम् अद्य समस्ताः भारत-वासिनः स्मरन्ति। अतः अहम् एकस्मै दिवसाय भारतस्य जनान् तथा स्वस्य देशं द्रष्टुम् आगतः।

''बाढम्!, अधुना सर्वप्रथमम् आवां कुत्र चलिष्यावः?'' अहं प्रसन्नः भूत्वा बापुम् अपृच्छम्।

''वयं सावरमत्याश्रमात् स्वयात्रां प्रारभामहे। आवां निमेषमात्रे तत्र प्राप्तौ। त्वम् अपश्यः तम्?''

''पश्य, इदं मम चक्रम् (चरखा)। अत्र कर्त्तयामि स्म।''

अहम् मध्ये एव अपृच्छम् - ''इदं कथं चाल्यते?''

''पश्य, इत्थम्''- सः च मां चक्रं (चरखा) चालयित्वा अदर्शयत्, पुनः अवदत्- ''पश्य, इदं तत् स्थानम् अस्ति यत्र अहम् उपविश्य लेखनं करोमि स्म। इदं च अस्ति मम प्रथमम् उपनेत्रम्, इदं च मम कलमम्''।

अधुना पश्य अत्र सर्वे प्रार्थनां कुर्वन्ति स्म।

''पुनः बापुः अकथयत्-अधुना त्वां दीर्घयात्रायै नयामि। ''

''सा दाण्डी यात्रा। वयं पदातयः एव समुद्र-पर्यन्तं गतवन्तः लवण-विधानं च उल्लंघितवन्तः। तस्मिन् बहूनां स्वतन्त्रता साहचार्यम् आसीत्। जानासि? वृद्धाः, बालकाः, स्त्रियः, युवानः पुरुषाः सम्मिलिताः अभवन्।'' बापुः उदतरत्।

इत्थं च एव वार्ताः कुर्वन्तौ आवां समुद्रतटं प्राप्तौ। तत्र केनापि श्वेतवर्णेन पुरुषेण, बापुः च माम् अफ्रीकायाः घटनाः अश्रावयत् '' कथं प्रथम-वारम् सह रेलयाने कलहः अभवत्? कथं च सः बापो अपमानं अकरोत्। कथं च अफ्रीकादेशे-पुनश्च भारते नूतनान् संघर्षान् कर्तुं बापुः प्रवृत्तः।

तावत् अहं श्रान्तः इव अभवम्। अहम् वापुम् अकथयम्- उपविशाव कुत्रचित्?''

बापुः अवदत्-''अधुना राजघाटं चलित्वा उपवेष्टव्यम्।'' आवां च एव राजघाटं क्षणेन प्राप्तौ यत्र जनाः कीर्तनं कुर्वाणाः आसन्। जनाः क्रमेण समाधौश्रद्धा प्रसूनानि समर्पयन्तः स्मा। वापुः तु मन्दं-मन्दं स्मयमानः आसीत्। सः मम स्कन्धे हस्तं निधाय अब्रवीत् ''पुत्र! अधुना मया गन्तव्यम्। ''

अहं बापोः चरणयोः प्रणिपत्य अवदम्- बापो! अद्य तव मुखात् तव कथां श्रुत्वा सम्यक् ज्ञानं मया लब्धम्। तत्क्षणमेव बापुः क्वचित् विलीनः अभवत्।

- विद्या-वैभव-भवनम्,
२९ , केसर-बिहारः, जगतपुरम,
जयपुरम्-३०२०१७ (राजस्थान)

नाटकम् (गीतमानय)

-परमानन्द शर्मा ''प्रमोद''

पात्राणि

तुलारामः - वणिक् / गृहपतिः

धनवती - तुलारामस्य पत्नी

लक्ष्मीः - तुलारामस्य पुत्री

श्रीवर्द्धनः - तुलारामस्य पुत्रः

चतुरसेनः - तुलारामस्य मित्रम्

मूषकः- ऊन्दुरः, चौरश्च

(प्रथमं दृश्यम्)

(वणिजः तुलारामस्य गृहम्। तुलारामः एकस्मिन् प्रकोष्ठे आसन्दे उपशिन् समाचारपत्रं पठति। ततः प्रविशति तस्य मित्र चतुरसेनः।)

चतुरसेनः- हरिः ओम्।

तुलारामः- हरिः ओम् मित्र! आगच्छतु आगच्छतु। आसन्दे आस्यताम्। अद्य तु प्रभात एव दर्शन संजातम्। किमपि नूतनमस्ति वा?

चतुरसेनः- (आश्चर्येण) अरे विस्मृतवान् भवान्? अद्य नगरं न गन्तव्यं किम्?

तुलारामः - (स्मरणं कृत्वा) आम्। दीपोत्सवः सन्निकटे अस्ति। वस्तूनि क्रेतव्यानि। अस्तु चलावः। मम स्यूतः कुत्रास्ति? (अन्वेषणं करोति। किन्तु स्यूतः न मिलति।) लक्ष्मि! अयि भो लक्ष्मि!

लक्ष्मी- (प्रविश्य) किं पितः? आज्ञापयतु।

तुलारामः- मम स्यूतः कुत्र? इदानीं नगरं गच्छामि। दीपोत्सवस्य कृते वस्तूनि क्रेतव्यानि।

लक्ष्मी- सः तु नागदन्ते अवलमिबतः अस्ति। (आनीय ददाति) स्वीकरोतु।

तुलारामः- (स्वीकृत्य) अस्तु तव कृते किम् आनयानि?

लक्ष्मी- मम कृते नूतनानि वस्त्राणि आनयतु?

श्रीवर्द्धन- (सहसा प्रविश्य) मम कृते किम् आनेष्यति तात!

तुलारामः- वदतु किमिच्छति?

श्रीवर्द्धनः- मिष्टान्नं वस्त्राणि च।

धनवती- (प्रविश्य) मह्यं किमपि आनेष्यति वा?

तुलारामः- वदतु।

धनवती- अन्या तु काऽपि इच्छा नास्ति। एका एव इच्छा अस्ति यत् ग्रामस्य सर्वा महिला प्रभाते उत्थाय घरटं चालयन्ती गीतंगायन्ति। अहम् एकमपि गीतंन जानामि अस्मात् कारणात् न गायामि। अतः मह्यमपि नगराद् एकं गीतमानयतु।

तुलारामः-अस्तु आनेष्यामि।

धनवती- आनेष्यामि आनेष्यामीति बहुवारं वदति किन्तु वारं वारं विस्मरति।

तुलारामः- अरे भाग्यवति! इदानीमवश्यमेव आनेष्यामि।

धनवती- चतुरसेन महोदय! भवान् स्मारयतु येन विस्मरणं न भवेत्।

चतुरसेनः- अस्तु भ्रातृजाये। स्मरयिष्यामि।

तुलासेन- तर्हि गच्छाव?

धनवती- अस्तु, शुभास्ते पन्थानः सन्तु।

(तौ गच्छतः)

(यवनिकापातः)

(द्वितीयं दृश्यम्)

(स्कन्धयो भारं वहन्तौ नगराद् आगतवन्तौ तुलारामचतुरसेनौ परस्परं वार्तालापं कुरुतः। अकस्मादेव तुलारामो मार्गे विरमति।)

तुलारामः- (आश्चर्येण) अयि भो!

चतुरसेनः- (विरम्य) भो मित्र! किमभवत्?

तुलारामः- भो चुरसेन! पत्न्याः कृते गीतं तु पुनः विस्मृतवान्। सा बहुवारम् उक्तवती अतः इदानीं रुष्टा भविष्यति। किमपि करोतु मित्र!

चतुरसेनः- इदानीं कि करवाणि। (इतस्ततः पश्यति) अरे तत्र किं प्रचलति? पश्यतु पश्यतु।

तुलारामः- (दृष्ट्वा) अरे तत्र मूषकः विवरं निर्माति। अतः भूमि खनति। एतदपि न जानाति किं भो!

चतुरसेनः- जानामि मित्र! किन्तु एकवारं तस्य कार्य सम्यक् पश्य। परितः बहूनि विवराणि सन्ति तथापि सः नूतनं विवरं निर्माति।

तुलाराम- (विनोदेन गायति) आम् पृच्छामि तावत्-

"मूषक रे त्वं खनसि किमर्थम्?"

चतुरसेनः- (तथैव विनोदेन) वारं वारं खनति च ह्येषः।

तुलारामः- सत्यम्! धूलिधूसरो जन्तु-विशेषः।

(ततः मूषकः खननकार्यं कुर्वन्नेव इतस्ततः पश्यतीति संकेतः)

चतुरसेनः- खनति च चक् चक्

तुलारामः- पश्यति टम्मक्

चतुरसेनः- रचयति विवरं पश्यति परितः

तुलारामः- पश्यति परितो ननु भयभीतः।

चतुरसेनः- (मूषकः विवरं निलीयते इति संकेतः)

तत्र निलीनो भवति किमर्थम्?

तुलारामः- मूषक रे त्वं खनसि किमर्थम्?

चतुरसेनः- (महोदय ! एषोऽस्माकं वार्तालापेन भीतः सन् पलायनं करिष्यति।

तुलारामः- न न करिष्यति। अहं विश्वासम् उत्पादयामि। (मूषकं लक्ष्यं कृत्वा पुनः गायति।) मा बिभ बन्धोः।शृणु रे भ्रातः!

विगतनिशायां भवति प्रभातः।।

चतुरसेनः- तावत् किं करिष्यति?

तुलाराम- तावद् धैर्यं धारय चित्ते।

ददामि तुभ्यं रे बहु वित्तम्।।

चतुरसेनः- मुष्णात्यन्नं वदतु किमर्थम्।

तुलारामः- मूषक रे त्वं खनसि किमर्थम्।

चतुरसेनः- (सहर्षम्) अहो मित्र! एतत् गीतनिर्माणमभवत्।

तुलारामः- (उत्साहेन) अहो उत्तमं मित्र! अतिसुन्दरं गीतम्। अस्माकं समस्या समाप्ता जाता।

चतुरसेनः- अस्तु शीघ्रं चलाव गृहं प्रति।

तुलारामः- अस्तु मित्र।

(तौ शीघ्रमेव गच्छतः)

(यवनिकापातः)

(तृतीयं दृश्यम्)

(तुलारामः स्वपत्नी धनवतीं तद् गीतं बोधितवान्। सा रात्रौ शीघ्रमुत्थाय घरट चालयन्ती गीतं गायति। तस्मिन्नेव काले एकः चौरः धनं चौरयितुं तस्य गृहस्य भित्तौ विवरनिर्माणं करोति।)

धनवती- (गीतं गायति) ''मूषक रे त्वं खनसि किमर्थम्? '' (पुनः)
''मूषक रे त्वं खनसि किमर्थम्?''

चौरः- (इतस्ततः दृष्ट्वा मनसि) मां कः पश्यति? (पुनः खनति)

धनवती- (गायति) वारं वारं खनति च ह्येषः।

(तस्मिन्नेव क्षणे एकः मृत्खण्डः चौरस्य उपरि पतति। तेन सः धूलिधूसरः संजातः।)

धनवती- (गायति) धूलिधूसरो जन्तु-विशेषः।।

चौरः- (इतँस्ततः सम्यक् दृष्ट्वा) अरे एषा मां दृष्ट्वती किम्?

धनवती- (घरटं चालयन्ती) खानती च चक् चक् पश्यति टम्मक्।
(चौरः इतस्ततः दृष्ट्वा पुनः खनति)
पश्यति टम्मक् खनति च चक् चक्।।

चौरः- अरे निश्चयेन एषा मां दृष्टवती। किं करणीयम् इदानीम्? (इति परितः पश्यति।)

धनवती-(गायति) रचयति विवरं पश्यति परितः।

पश्यति परितो ननु भयभीतः।।

चौरः- तावद् एवं करोमि अत्र अन्धकारे कुत्रापि निलीनो भवामि।

धनमती- (गायति) तत्र निलीनो भवति किमर्थम्?

मूषक रे त्वं खनसि किमर्थम्?

चौरः- (अतीव भयभीतः सन्) इदानीं तु नास्ति मुक्तेः कोऽपि उपायः।

धनवतीः- (गायति) मा बिभ बन्धोः!शृणु रे भ्रातः!

विगतनिशायां भवति प्रभातः।।

चौरः - (उद्विग्नो भूत्वा) न जाने कस्य मुखं दृष्टवान्? प्रभात एव एषा विपत्तिरापतिता। अग्रे किं भविष्यति। हे भगवन् ! त्रायस्व मां त्रायस्व। एषा तु सर्वं ज्ञानवती।

धनवती- (गायति) तावद् धैर्यं धारय चित्ते।

ददामि तुभ्यं रे बहु वित्तम्।।

(प्रसन्नो भूत्वा) प्रातः काले एषां मह्यं धनं दास्यति। (क्षणं विरम्य) न.... ..न..... अहं तु चौरोऽस्मि। मह्यं किमर्थं दास्यति?

धनवती- (गायति) मुष्णात्यन्नं वदतु किमर्थन्।

मूषक रे त्वं खनसि किमर्थम्।।

(व्यग्रो भूत्वा) अरे कुत्र सुरसायाः मुखे आपतितम्। (सम्यक् विचिन्त्य) अहो एषा तु मां भ्राता बन्धुश्चोक्तवती। (हीनभावनया) पुनश्चाहं....? धिङ् माम्। धिड़ चौर्यवृत्तिम्। किन्तु अनेन व्याजेनाहं भगिनीं प्राप्तवान्। एषा करुणामयी प्रतीयते। तर्हि एतस्याः पादयोः पतित्वा क्षमां याचे।

धनवती- (तथैव गायति) मूषक रे त्वं खनसि किमर्थम्?

चौर- (धनवत्याः पादयोः पतित्वा) अहो देवि! क्षम्यतां देवि! क्षम्यताम्। अस्मात् परं कुत्रापि चौर्यकार्यं न करिष्यामि। इदानीं क्षमस्व।

धनवती- (साश्चर्यं चौरं पश्यति वदति च) अरे भवान् कः? उत्तिष्ठतु उत्तिष्ठतु।
(यवनिकापातः)

-श्रीमथुराधीश मन्दिरं,
चमना बावड़ी पर -शाहपुरा,
जिला- भीलवाड़ा
(राजस्थानम्) -३११४०४

प्रबन्धक-योग्यता

-डॉ० नारायण शास्त्री काङ्करः

एकस्यां निर्माण-शालायां सदाचारिणः शौचवतः प्रबन्धकस्य आवश्यकता आसीत्। विज्ञप्तेः अनुसारेण एकः वकार्यता-ग्रस्तः युवकः साक्षात्कारार्थम् उपस्थितः। निर्माणशालाध्यक्षः तं चारित्रिकं प्रमाणपत्रम् अग्रिमं च एकसहस्र-रूप्यक-धनराशिं सुरक्षा-रूपे अयाचत। युवकः अकथयत्-

"मम पितुः एकः सम्बन्धी मां परिचिनोति। सः एव भवतः अपेक्षौ पूरयिष्यति, मया सह कृपया चलतु तावत्।"

निर्माणशालाध्यक्षः तथा एव अकरोत्। सम्बन्धी अकथयत्- "तव सदाचारितां जानामि, किन्तु वाञ्छित-मुद्राः किं दद्याम्? किम् अहं तव पितृव्यः?

युवकः निराशःभूत्वा स्वाञ्चलस्य आरक्षि-स्थाने निर्माणशालाध्यक्षम् अनयत्। तत्र आरक्षि- प्रमुखः स्वापराधिसूच्यां तस्य नाम न दृष्ट्वा कथितवान्-

"चल चल इतः। रूप्यकाणि किम् अत्र मिलन्ति?"

सर्वथा निराशः निर्माणशालाध्यक्षस्य याचनां न पूरयन् युवकः स्वगृहं प्रस्थातुम् एव उद्यतः आसीत् यत् तं सः निर्माणशालाध्यक्षः अवोचत्-

"श्वः कार्यालये उपस्थाय कार्यं प्रारब्धव्यम्। त्वं परीक्षितः असि। सर्वत्र प्रकारान्तरेण तव सदाचरिता शुचिता एव च प्रमणिता" इति।

-शिक्षा-

शुचिः शान्तः सदाचारी, मृदुभाषी स्मितानन:।
यावत् प्रबन्धको नेदृक्, तावत् संस्था फलेन्नहि।।

-विद्या-वैभव-भवनम्,
२९-केसर-विहारम्
जगतपुरा, जयपुरम्-३०२०१७, राजस्थानम्

ग्रामोऽयं विनष्टो भवेत्

-डॉ० केशवरामशर्मा

एकस्मिन्काले 'गुरुनानकदेवः मरदाना' इति नाम्ना प्रसिद्धेन शिष्येण' सह स्वधार्मिकयात्रा पदातिरेव गच्छति स्म। तौ यत्रापि रात्रिविश्रामम् अकुरुतां तत्र रात्रौ सत्सङ्गो भवति। नानकदेवो ग्रामदेवो ग्रामवासिनां धार्मिकोपदेशान् अददात्, मरदाना च 'रबाब' नामकस्य वाद्यस्य वादनेन सह भजनमगायत्। प्रातः काले स्नानादि कृत्वा तावग्रिमयात्रायां प्रवृत्तौ अभवताम्।

एकदा सन्ध्याकाले तौ एकं ग्रामं प्रवेष्टुं प्रायताम्। परं तस्य निवासिनौऽनयोस्तत्र प्रवेशं न वाञ्छन्तिस्म तैरपशब्दाः प्रयुक्ता अनयोरुपरि पाषाणखण्डाश्च क्षिप्ताः। खिन्नौ भूत्वा इमौ ग्रामाद्बहिरागतौ। एकं कूपं दृष्ट्वा तस्य जलमपिबतां, तस्य समीपमेव च निराहारौ स्थितौ। एवं सा रात्रिर्व्यतीता।

अपरे दिने ऊषंकाल एव तौ स्वयात्रायां प्रवृत्तावभवताम्। गुरुणा शिष्यायोक्तम्-''स निरङ्कारः प्रभुः इमान् ग्रामीणान् प्रति कृपालुभवेत् इमे सदा सुखिनोभवन्तु। एषां क्षेत्रेषु धान्यानां सदैव वृद्धिर्भवतु पशुधनस्यापि तथैव कुशलं भवेत्, सर्वेऽपि निरामयाः सन्तु।''

संयोगात् द्वितीये दिने तौ यत्रागच्धछतां तस्य ग्रामस्य निवासिभिरनयोः बहुमानं दत्तम्। तैः सोत्साहमाभ्यां दुग्धं, फलानि, मिष्टान्नानि च साग्रहं निवेदितानि। भोजनस्य आवासस्यापि च तथैवोत्तमव्यवस्था कृता।

सर्वैः सादरं गुरुदेवस्योपदेशाः श्रुताः सानन्दं संगीतस्यानन्दो लब्धः। प्रातः कालेऽनेकैनीनकदेवस्यशिष्यत्त्वमपि गृहीतम्। द्वितीये दिवसेऽपि तैः अनयो स्तत्रैव निवासाय प्रार्थना कृता, किन्तु गुरुदेवस्स्व नियमानुसारं ततः प्रस्थितः।

ग्रामाद्बहिर्गत्वा नानकः स्वशिष्याय कथयति-''मम कामनास्ति, यद् ग्रामोऽयं विनष्टो भवेत्। अस्य निवासिनश्च सम्पूर्णदेशे यत्र-तत्र गच्छन्तु ।''

एतत्सर्वं शिष्या च असह्यमासीत्। सोऽकथयत्- ''गुरुदेव! कीदृशोऽयं भवतां आशीर्वादः ये दुष्टाः ते स्वग्रामे सुखेन वसन्तु। ये सभ्याः, गुणशीलाः, सज्जनाश्च ते विनष्टे ग्रामे सम्पूर्णदेशे यत्र-तत्र गच्छन्तु-इति।

नानकदेवस्समाधानं करोति- ''चिन्तनं कुरु। ते दुष्टाः स्वग्रामपर्यन्तमेव सीमिता भवन्तु, येन तेषां दुर्गुणैस्समाजस्य देशस्य च विशेषेणाहितं मा भवेत्। पुनश्च इमे सदाचारिणः जना यत्र-तत्रापि गमियन्ति तत्रैव स्वगुणानां सुगन्धं प्रसारयिष्यन्ति। देशस्यान्यनागरिका अपि एषां सदगुणैः प्रभाविता भविष्यन्ति, इत्थञ्च सम्पूर्णसमाजस्य देशस्य च महत्कल्याणं भविष्यति।

- बी-५९, वीथिसङ्ख्या ३
इन्दिरानिकेतनम्
(उत्तरी छज्जूपुरम्)

अनिष्ट-चिन्तकस्य कुशलं न

-डॉ० नारायण शास्त्री काङ्करः

धनोपार्जनार्थं देशान्तरं गच्छतोः द्वयोः मित्रयोः हस्ते नगर-समीपे एव वने भूमौ सुरक्षितः एकः बहुमूल्यरत्न पूर्णः कलशः लग्नः। सुदूरं पदयात्रया तयोः उदरे उन्दुराः कूर्दितुं प्रावर्त्तन्त। 'तयोः एकः नगरे गत्वा पक्वान्नम् आनयतु, अन्यः च पृष्ठे तत्र स्थित्वा कलशस्य रक्षां करोतु' इदं द्वाभ्यां विचार्य तथा एव कृतम्।

नगरं गतः सुहृद् पूर्वम् उदरपूरं मिष्टान्नं भक्षितवान्, पुनः ततः वनस्याय अपि मिष्टान्नम् आदाय आगच्छत। तस्य मनसि विचारः आयातः यत् 'यदि मित्रं म्रियेत तर्हि सम्पूर्णः कलशः तस्य एव अधिकारे स्यात्' इदं विचार्य सः मिष्टान्ने विषम् अमेलयत्।

तत्र वनस्यः सुहृद् अपि विचारयति स्म यत् 'अहं तं मारयित्वा अस्य कलशस्य एकाकी स्वामी भविष्यति।'

मिष्टान्नम् आदाय आगतं मित्रं स छुरिका प्रहारेण मारितवान्। पश्चात् प्रसन्नः सः बुभुक्षातुरः मिष्टान्नं भक्षित्वा विष-प्रभावेण स्वयम् अपि मृतः। जडः कलशः तु तत्र एव स्थितः आसीत् इति।

-शिक्षा-

योऽन्यस्मै खनले खातं, तस्मै कूपः स्थितः पुरः।
चिन्तयन्तौ मिथोऽनिष्टं, नष्टौ द्वौ सुहृदौ न किम्?।।

- विद्या-वैभव-भवनम्,
२९-केसर-विहारम्
जगतपुरा, जयपुरम्-३०२०१७,
(राजस्थानम्)

क्रोधालुः ऋषिः

-डॉ० हर्षदेवमाधवः

एकः महान् ऋषिः आसीत्। तस्य नाम सुदर्शनः आसीत् किन्तु सर्वे ऋषयः तं क्रोधदर्शनं कथयन्ति स्म। क्रोधदर्शनः उग्रं तपः करोति स्म। किन्तु सः वारं-वारं कुपितः अभवत्। एकदा सः वटवृक्षतले उपाविशत्। तत्र विहगानां कुहुकारं श्रुत्वा सः कुपितः अभवत्। सः अवदत्, 'अयं वृक्षः निरर्थकः। अयं वृक्षः शीघ्रं पततु।' अतः तस्य तपसः प्रभावात् वृक्षः भूमितले निपतितः।

अन्ये तपस्विनः तस्य दर्शनार्थं न आगच्छन्ति स्म। प्राणिनः अपि तं दृष्ट्वा प्रतिनिवर्तन्ते स्म। किन्तु क्रोधदर्शनस्य स्वभावे क्रोधस्य उग्रता तथैव अवर्तते।

एकदा प्रातः काले क्रोधदर्शनः यज्ञकुण्डे समिद्धिः यज्ञं करोति स्म। समीपे घृतपात्रम् आसीत्। तदा सहसा एकः विशालकायः मूषकः कुटीरं प्राविशत्। सः आगत्य घृतपात्रात् घृतम् अपिबत्। ऋषिः तं रक्तनेत्राभ्याम् अपश्यत्। किन्तु तम् उपेक्ष्य मूषकः सर्वम् अपि घृतम् अपिबत्। ऋषिः कोपात् वेपते स्म। तदा मूषकः तस्य उपहासम् अकरोत्, 'महर्षे ! क्रोधदर्शन! कोपं कुरु। मां भस्मसात् कुरु।' क्रोधदर्शनः अवदत्, 'दुष्ट! त्वं भस्मसात् भव!' किन्तु ऋषेः वचनस्य मूषकोपरि न कोऽपि प्रभावः अभवत्।

अहो! समाप्तं मम तपः । पुनः तपस्यां करिष्यामि इति विचार्य सः कोधदर्शनः तत्र एव पद्मासने विपघासने उपाविशत्। सः कठिनं तपः अकरोत्।

यदा सः नेत्रे उन्मील्य ध्यानम् अत्यजत् तदा सः तस्य सम्मुखं स्थितम् चतुर्भुज विष्णु ईश्वर अपश्यत् ईश्वर दृष्ट्वा क्रोधदर्शनः पादयोः अपतत्। ईश्वरः अवदत्, 'वत्स! कस्मात् कुपितः भवसि? क्रोधेन तव तपः नश्यति। क्रोधदर्शनः अवदत्, 'भगवन्! क्षमस्व मम अपराधान्।' क्रोधदर्शनः भगवन्तं प्रणामम् अकरोत्। सः अवदत् 'भगवन्! मम कोपस्य नाशं कुरु। ईश्वरः अवदत्-वत्स! लोभः क्रोधः रागः द्वेषः मुनष्यस्य चित्ते वसन्ति। परं विवेकः अपि तव चित्ते अस्ति। ज्ञानेन विवेकेन च एतेषां दुर्भावानां नियन्त्रणं मनुष्येण स्वयमेव कर्त्तव्यम्। तत् एव यथार्थं तपः। इति उक्त्वा विष्णु स्वलोकं प्रत्यगच्छत्।

- ८, राजतिलक वंगलो नं. ,आबाद नगरम्,
भोपाल, अहमदाबाद- ३८००५८

सहनशीलतायाः प्रभावः

-डॉ० लता विगः

एकस्मिन् वने एकस्य सन्तस्य उटजः आसीत्। प्रतिदिनम् अनेके नाः तस्य सन्तस्य प्रवचनं श्रोतुम् आगच्छन्ति स्म। परं एकदा अकस्मात् अति वृष्टिः अभवत्। कोऽपि तस्य सन्तस्य प्रवचनं श्रोतुं नागतः। सः सन्तः स्वयमेव पुस्तकं पठितुम् आरब्ध वान्। तदैव एकः दस्युः शैतानः सिंहः सन्तस्य समीपे आगतः। परम् सन्तः पुस्तकपठने लीनः आसीत्। तदैव सः दस्युः कुद्धः तमकथयत्-भो! तव ध्यानं कुत्र अस्ति? किं त्वम् मम विषयं किञ्चिदपि न जानीषे? अहं प्रतिदिनं वने जनान् लुण्ठामि मारयामि च। मह्यं धनं देहि, नो चेत्, त्वां हनिष्यामि। सन्तः अवदत् मम पार्श्वे धनं नास्ति केवलं ज्ञानमस्ति तद् गृहाण। एतत् श्रुत्वा सः दस्युः साट्टहासं कथितवान्। अहम् तव वधं कर्तुमिच्छामि। मरणाय तत्परः भवः। सन्तोऽवदत्-'सम्यक' । परम् मरणात् पूर्वं मम एका इच्छा अस्ति। दस्युः अवदत्- वद, किमच्छिसि? सन्तः कथितवान्-अत्र समक्षे एकः आम्रवृक्षः अस्ति। तस्य एकां शाखां छित्वा अत्र आनय। एतत् श्रुत्वा दस्युः आम्रवृक्षस्य एकां शाखां छित्वा तस्य सन्तस्य समीपे आनीतवान्। सन्तः पुनः दस्युम् अवदत्-अधुना त्वम् पुनः इमाम् शाखां तेन वृक्षेण योजयतु। इति श्रुत्वा सः दस्युः तारस्वरेण हसितवान्। त्वया बहूनि पुस्तकानि पठितानि। परम् त्वम् मूर्खः असि। छिन्ना शाखा पुनः वृक्षेण सह एतत् श्रुत्वा सन्तः तम अवदत्-यथा छिन्ना शाखा पुनः वृक्षेण सह एवेमव यः मानवः त्वया छिन्नः , किम् त्वम् तम् पुनः योजयितुं न शक्यते जीवयितुं वदतु। इति श्रुत्वा दस्युः अविचारयत्- मया तु अनेके जनाऽ मारिताः इति। सः लज्जितोऽभवत्। सन्तस्य चरणयोः अपतत्। क्षमस्व क्षमस्व मया बहु-अपराधः कृतः।

- संस्कृत अध्यापिका
डी० ए० वी० सैन्टेनरी पब्लिक स्कूल
पश्चिम-एन्क्लेव

पुत्रप्राप्त्यर्थम् कामना

- सरला पटैरिया

कश्चित् राजा आसीत्। तस्य सहस्राणाम् भार्याः सन्ति। किन्तु तासु सन्तानिकः चापि नृपः न लेभे। रूप औदार्य वयः, जन्म, विद्या, ऐश्वर्य, श्रियः आदिभिः संपन्नस्य गुणैः सर्वैः चिन्ता बन्ध्यापतेः अभूत। तस्य संपदः सर्वा महिष्यो वामलोचनाः न प्रीतिहेतवः अभवन्। तस्य भवने एकदाः कश्चित् ऋषिः लोकान् अनुचरन् उपागच्छत्। विधिवत् तम् पूजयित्वा क्रतं आतिथ्यम् सः उपासीदत्। ततः महर्षि समाभाष्य अहं लक्ष्ये त्वाम् अलब्ध कामम् चिन्त्या सवलम् मुखम् । हे ब्रह्मन्! तथापि भवतः विदुषः अपि किन्तु माम् पृच्छतः ततः ब्रूयाम्- लोकपालैः अपि प्रार्थ्य, साम्राज्यं ऐश्वर्यम् च सम्पदः न नन्दयन्ति अप्रभम् माम्। महाभाग! ततः पाहि पूर्वे सह गतं तमः यदा तरेम् दुष्पारम् प्रजया तद् विधेहि नः। राज्ञः इति प्रार्थितः सह ऋषिः उवाच- हे राजन्! तव एकः आत्मजः हर्ष शोकप्रदः तुभ्यम् भवितः। सः ऋषिः एतद् उक्त्वा ययौ।

तदन्तर सम्यक् काले उपावृते एकः कुमारः समजायत्। प्रहृष्टः राजा कुमारस्य जातकर्म संस्कारम् कार्यामास। हृष्टो राजा कुमारस्य स्नातः शुचिः अलंकृतः वाचयित्वा आशीषः विप्रैः जातकम् कार्यामास। राजर्षेः तनये अनुदिनम् स्नेहः अन्ववर्धत्। मातुः तु पुत्रे स्नेहो अतितराम् समुद्भवः।

पुत्रहीना अन्येषां सपत्न्याः पर्यतप्यन् आत्मानं अभ्यसूयया दुखेन् उद्विग्नाः आसन्। सन्दह्य सपत्न्याः पुत्र सम्पदां विलोक्य राज्ञः असम्मत् वृत्तिनाम् विद्वेषः अभूत्। विद्वेष नष्ट मतयः स्त्रियो दारुण चेतसः नृपतिम् प्रति दुर्मषाः कुमाराय विषम् ददुः। सपत्नीनाम् अघम् न जानन्ति पुत्रस्य माता सुप्तम् इतिः सन्चित्य निरीक्ष्य ग्रहे विचरत्। शयानम् सुचिरम् बालम् उपधार्य माता धात्रीं आज्ञां ददुः- भद्रे मे पुत्रं आनय इति। सा शयानाम् उपवृत्य दृष्टवा उत्तार लोचनम् सहसा मृतम् कुमारम् ददर्श विलापम् अकरोत्। तस्याः उच्चैः स्वरैः श्रुत्वा रानी तत्र आगता मृतं कुमारम् दृष्टवा सा अपि रोदन् अकुर्वन्। परिवृद्धया शुचा सा पपात् भूमौ। ततः नृपः अन्तः पुर वर्तिनो जनाः निशम्य रोदनम् तत्र आगत्य मृतं पुत्रं दृष्टवा शोकं कृतवान्। श्रुत्वा मृतं पुत्रं अलक्षित

अंतकम् विनष्ट दृष्टि : स्नेह-अनुबन्ध एधितया शुचा भ्रषम् विमूर्छितः बालस्य पाद् मूले पपात्। उरू-शुच अर्पितम् पतिम् विलोक्य तथा मृतं पुत्रम् च सुतं एक सन्ततिम्। चित्रधा विललाप्।

सुतं शुशोच कुररी इव चित्रम् सुस्वरम् भाषते। त्वम् तात् न अर्हसि च माम् कृपणाम् अनाथाम् त्यक्तुम्। उत्तिष्ठ तात्! सुप्तः चिरम्, इत वदितः शुचो विलपन्त्याह। अहो विधाता! त्वम् अतीव क्रूरः इति उक्तवान् पुनः पुनः विलापं अकरोत्। विलपन्त्याह मृतं पुत्रं इति चित्रम् विलापनैः राज्ञः भृशं तप्तो मुक्तकण्ठो रुरोद ह। सर्वे दम्पत्योः अनुवृताः रुरुदुः।

तस्मिन् समये ऋषिः आगतवन्-दृष्टवा शोकाभिभूतम् राजानम् एवम् उक्तिभिः बोधयन्तौ- कः अयम् स्यात तव राजेन्द्र! भवान् यम् अनुशोचति हे राजन्! यथा बालुकाः श्रोतोवेगेन प्रयान्ति संयान्ति तथा देहिनाः कालेन संयुज्यन्ते वियुज्यन्ते च। देहिनोऽस्मिन् यथा देहे कौमारम् यौवनम् जरा। तथा देहान्तर प्राप्तिः धीरः तत्र न मुह्यति।।

एतद् श्रुत्वा राजा अब्रवीत्-तस्मात् भवान् उदीर्यताम् ज्ञानदीपः। भोः राजन्! त्वम् भगवत् भक्तः असि। इत्थं त्वाम् पुत्र शोकेन् मग्नम् तमसि दुस्तरे त्वम् भगवत् भक्तः न अवासादितुम अर्हसि। अयम् हि देहिनो देहि विविधः सन्तापक्लेश कृत उदाहृतः तस्मात् स्वस्थेन् मनसा विमृश्य गतिं आत्मनः उपशमं आविश। गुरुरूपेण ऋषिम् राज्ञः उक्तवान्।

गुरुर्ब्रह्म गुरुविष्णुः, गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म, तस्मै श्रीगुरवे नमः।।
ध्यानमूलं गुरुर्मूर्ति, पूजामूलं गुरुपदम्।
मंत्रमूलं गुरोर्वाक्यं, मोक्षमूलं गुरोःकृपा।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया
चक्षरु उन्मीलितं येन तस्मै श्रीगुरवे नमः।।

तस्मात् एकदां राजा वने विचरन्तम् बहवः बालकान् दृष्टवा प्रसन्नम् भूत्वा तेषां समीपे आगत्य प्रहृष्ट मनसा तान् अप्रच्छत्- हे सुवीराः! त्वां सर्वे अत्र किम् अर्थम् आगतः? सर्वे बालकाः ताम् प्रणम्य उवाच-अस्मान् गृहे वयं सर्वे अर्थहीनाः

भूत्वा यतः ततः विचरन्ति। आवाम् मात्रपित्रयोः अपि एतद अर्थाय विचरन्ति। यदा कदा वयं भोजनम् न प्राप्नुयामः। अस्मिन् समये वयम् सर्वे बालकाः क्षुधापीड़ितेन् व्यथिताः। तेषाम् बालकानाम् वचनम् श्रुत्वा सः राजा चिन्ताम् अकरोत्। सः सर्वे बालकान् स्व गृहे आनय च तेषाम् भोजनम् दीयताम्। तस्य भवने सर्वे बालकाः वासम् कार्यामास। सः राजा तान् विलोक्य अति प्रसन्नाः भूत्वा पिता इव तासाम् पालयामास। तस्य भवने प्रतिदिनम् अपारवैभवम् उत्पन्नाः। पुत्र सम्पन्नः महाभाग सः राजा निश्चिन्त भूत्वा सादरम् अतीव दयावान् मनसा स्व राज्यम् सर्वान् बालकान् समर्पितवान्।

ऋषिः उवाच- हे नृपः! अहम् ते पुत्रकामस्य पुत्रदः अस्मि। अहम् त्वाम् एताम् मन्त्र उपनिषदम् प्रतीक्ष प्रयतः मम्। यां धारयन् सप्त रात्राद् दृष्टा विभुम् संकर्षणम्। राजा यथा ऋषिः भाषिताम् तथा सुसमाहितः भक्तिं धाारयामास। सप्त रात्रान्ते सः विद्या धाार्यमाणया भक्तिफलम् लेभे। ततः कतिपय दिनोपरान्ते सः देवदेवस्य चरणान्तिकम् जगाम्। भगवत् दर्शनात् नष्टः तस्य समस्त किल्विषः।

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिः आदि गोविन्दः सर्वकारण कारणम्।।
राजा ईश्वरस्य प्रार्थनां अकरोत्-
अद्वैतम् अच्युतम् अनादिं अनंत रूपम्
आद्यं पुराण पुरुषम् नवयौवनम् च
वेदेषु दुर्लभं अदुर्लभम् आत्म भक्तो
गोविन्दम् आदि पुरुषमं तं अहं भजामि।।

-पूर्व प्राचार्यः शासकीय उच्चतर मा. विद्यालयः
७८-ए, तृतीय तलम्, राधेश्याम पार्क एक्सटेंशनम्,
देहली-११००५१

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

''संस्कृत-चन्द्रिका''

नैतिक मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

''संस्कृत-चन्द्रिका''

(आई.एस.एस.एन.-२३४७-१५६५)

संस्कृत भाषा के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.२५०/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

''संस्कृत-चन्द्रिका''

के स्थायी अध्येता बनें ।

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा सचिव, दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस. डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।